दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदत्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतःसरीसृपतंवरीवृजन्मर्मृज्यागनीगन्तीति च। (६८/३५९६)

दाधर्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्ते अलर्षि आपनीफणत् संसनिष्यदत् करिक्रत् कनिक्रदत् भरिभ्रत् दविध्वतः दविद्युतत् तरित्रतः सरीसृपतम् वरीवृजत् मर्मृज्य आगनीगन्ति इत्येतानि [1]अष्टादश छन्दसि विषये निपात्यन्ते[2]।

दाधर्ति दर्धर्ति दर्धर्षि इति धारयतेः, धृङो वा श्लौ यङ्लुकि वा अभ्यासस्य दीर्घत्वं णिलोपश्च। दाधर्ति। एवं [3]दर्धर्ति (ऋ. ५.८४.३)। श्लौ रुक् अभ्यासस्य निपात्यते। तथा दर्धर्षि इति। अत्र च 'यल्लक्षणेन अनुपपन्नं तत् सर्वं निपातनात् सिद्धम्' (भा.का.प. ३१)।

[4]बोभूतु इति – भवतेः यङ्लुगन्तस्य लोटि गुणाभावो निपात्यते। नैतदस्ति प्रयोजनम्, अत्र 'भूसुवोस्तिङि' (७.३.८८/२२२४) इति गुणाभावः सिद्धः? ज्ञापनार्थं तर्हि निपातनमेतत्। ज्ञापयति, अन्यत्र यङ्लुगन्तस्य गुणप्रतिषेधो न भवति इति। बोभोति, बोभवीति (ऋ. ३.५३.८)।

तेतिक्ते (ऋ. ४.२३.७) – तिजेः यङ्लुगन्तस्य आत्मनेपदं निपात्यते। यङो ङित्त्वात् प्रत्ययलक्षणेन आत्मनेपदं सिद्धमेव? ज्ञापनार्थं तु आत्मनेपदनिपातनम्, अन्यत्र [5]यङ्लुगन्तादात्मनेपदं न भवति[6]।

अलर्षि इति – इयर्तेः लटि सिपि अभ्यासस्य हलादिः शेषापवादो रेफस्य लत्वं निपात्यते। सिपा निर्देशोऽतन्त्रम्, तिप्यपि दृश्यते 'अलर्ति दक्षः' (ऋ. ८.४८.८)।

आपनीफणत् (ऋ. ४.४०.४) इति – फणतेराङ्पूर्वस्य यङ्लुगन्तस्य शतरि [7]अभ्यासस्य [8]नीक् निपात्यते। संसनिष्यदत् (मै. १.११.२) इति – स्यन्देः संपूर्वस्य यङ्लुक्, शतर्येव अभ्यासस्य [9]निक्, धातुसकारस्य [10]षत्वं निपात्यते। न चास्य [11]सम्पूर्वता तन्त्रम्, अन्यत्रापि हि दृश्यते, आसनिष्यदत् इति।

करिक्रत् (ऋ. १.१३१.३) इति – करोतेः यङ्लुगन्तस्य शतरि चुत्वाभावः, अभ्यासककारस्य रिगागमो निपात्यते।

कनिक्रदत् (ऋ. १.१२८.३) इति–क्रन्देः लुङि च्लेः अङादेशः, द्विर्वचनमभ्यासस्य, चुत्वाभावः, निगागमश्च निपात्यते। तथा चास्य हि विवरणं कृतम्। अक्रन्दीत् इति भाषायाम्।

भरिभ्रत् (ऋ. १०.४५.७) इति – बिभर्तेः यङ्लुगन्तस्य शतरि 'भृञामित्' (७.४.७६/२४९६) इति इत्वाभावो जश्त्वाभावोऽभ्यासस्य रिगागमः निपात्यते।

दविध्वतः इति – ध्वरतेः यङ्लुगन्तस्य शतरि जसि रूपमेतत्। अत्र अभ्यासस्य विगागमः ऋकारलोपश्च निपात्यते। 'दविध्वतो रश्मयः सूर्यस्य' (ऋ. ४.१३.४)।

---

1. अष्टादश नास्ति क, शब्दरूपाणि इत्यधिकम् ब, रूपाणि इत्यधिकम् ह. 2. छन्दसि इति चकारेण अनुकृष्यते इत्यधिकम् ब. 3. दर्धर्ति दर्धर्षि तस्यैव धारयतेः अभ्यासस्य रुगागमो निपात्यते इ. 4. बोभूतु इति नास्ति ब. 5. यङ्लुगन्तो न भवति इ. 6. इत्येतदेव ज्ञापकम् इत्यधिकम् ह. 7. एव इत्यधिकम् ड. 8. निगागमो निपात्यते ब. 9. निगागमो निपात्यते इ. 10. च इत्यधिकम् ई. सम्पूर्वतन्त्रम् क.